# CLASS – IX
## MIDTERM EXAMINATION (2023-24)
## SUBJECT - SANSKRIT
## SET – A

समयः - होरात्रयम्

पूर्णाङ्काः - 80 अङ्काः

निर्देशा: -

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति -

(ii) अस्मिन् प्रश्नपत्रे पृष्ठानाम् संख्या 7 प्रश्नाः च 15 सन्ति। सर्वे प्रश्नाः अनिवार्या:।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

प्र-1 गद्यांशम् पठित्वा प्रश्नान् उत्तरत- 10

अस्मिन् संसारे असंख्याः भाषाः सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा विद्यते। संस्कृता परिष्कृता दोषरहिता भाषा एव संस्कृत भाषा कथ्यते। इयमेव भाषा देवभाषा, गीर्वाणगी:, सुरवाणी इत्यादिभिः शब्दैः संबोध्यते। एतानि नामानि एव अस्याः भाषायाः महत्त्वं सूचयन्ति।

संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणां मूलरूप ज्ञानाय एतस्या आवश्यकता भवति। यादृशं महत् साहित्यं संस्कृत-भाषायाः अस्ति तादृशं अन्यासां भाषाणां नास्ति। अस्यामेव भाषायां ब्राह्मण- ग्रन्थाः आरण्यकाः अध्यात्मविषयप्रतिपादका उपनिषदः, वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकाव्यं महाभारतमपि संस्कृतस्य गौरवं वर्धयतः। अनयोः ग्रन्थयोः विषयं गृहीत्वा एव विशालस्य (संस्कृत) साहित्यस्य रचना संजाता।

(क) एकपदेन उत्तरत - 2

(i) सर्वोत्तमा भाषा का विद्यते?

(ii) जगतः सर्वासां भाषाणां जननी का अस्ति?

(ख) पूर्णवाक्येन उत्तरत - 4

(i) कीदृशी भाषा संस्कृतभाषा कथ्यते?

(ii) संस्कृतभाषा कैः शब्दैः संबोध्यते?

(ग़)भाषिककार्यम् 3

(i) अस्मिन् गद्यांशे 'असंख्याः' इति विशेषणपदस्य विशेष्यं किम्?

(ii) संस्कृतभाषायाः उपर्युक्तगद्यांशे पर्यायशब्दाः के सन्ति?

(iii) "संस्कृतभाषा सर्वोत्तमा विद्यते"_इत्यत्र क्रियापदं किम्?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत 1

प्र-2 अधः प्रदत्तम् चित्रम् आधृत्य शब्द-सूच्याः/मजूषायाः सहायतया पञ्चवाक्यानि उत्तरपुस्तिकायां लिखत - 5



मञ्जूषा - इदं, गृहम्, सर्वतः, पुष्पाणि, वृक्षेषु, मन्दिर, प्रातःकाले, पूजा, वयं कुर्मः।

प्र-3 मित्रं प्रति लिखितं निम्नलिखितं पत्रं मजूषायां प्रदत्तैः उचितैः शब्दैः पूरयत ।- 5

मजूषा- विना, तत्र, वयं, सस्नेहं, चेन्नईतः, ह्यः, मग्नाः अपि ,कथनीयः,शेखरः।।

(i) ………….

दिनाङ्कः 25.03.20–

प्रिय मित्र दिवाकर !

(ii) …………… नमस्ते ।

(iii) ……………… अहं मित्रैः सह जन्तुशालां द्रष्टुं काननवनम् अगच्छम् । तत्र (iv) ………………… अनेकान् पशून् अपश्याम । सर्वे पशवः इतस्ततः भ्रमन्ति स्म । सिंहाः उच्चस्वरैः अगर्जन् । मयूराः नृत्ये (v) …………… आसन्। वस्तुतः मयूरं (vi)…………… जन्तुशालायाः भव्यशोभा कुत्र ? तत्र आम्रवृक्षाः अपि

आसन्, कोकिला (vii) ..............आसन् । वस्तुतः यत्र आम्रवृक्षाः (viii) ................ कोकिला तु भविष्यति एव । अग्रे पुनः लेखिष्यामि । सर्वेभ्यः मम नमस्कारः .(ix)...........................।

भवदीयम् अभिन्नमित्रम्

(x)................................

प्र-4 गुरुशिष्ययोः वार्तालापः मंजूषायाः सहायतया पूरयत- 5

आचार्यः - रमेशः किमर्थम् अद्य विद्यालयं नागतवान्?

सुरेशः - अद्य रमेशस्य ज्वरः अस्ति। सः औषधं पीत्वा (i) .......... कृतवान्। अतः विद्यालयं नागतवान्

आचार्यः - भोः छात्रा! अत्र आगच्छ त। मण्डलाकारेण उपविशत। (ii) ........... क्रीडामः।

संजयः - आचार्य! अहं (iii) ............ उपविशामि?

आचार्यः - त्वं किमर्थं विलम्बं करोषि? स्नेहायाः (iv) ..... उपविश।

छविः - आचार्य का क्रीड़ा? कः (v) ....... ?

मञ्जूषा - , पार्वे, निद्रां, नियमः, कुत्र, क्रीडां,

प्र-5. – (क) उच्चारणस्थानम् चित्वा लिखत - 5

(i)'श्' वर्णस्य उच्चारणस्थानं भवति-
(ii)'व्' वर्णस्य उच्चारणस्थानं भवति-
(iii)'ल्' वर्णस्य उच्चारणस्थानं भवति-
(iv)'च्' वर्णस्य उच्चारणस्थानं भवति-
(v)'आ ' वर्णस्य उच्चारणस्थानं भवति-

(ख) वर्णविच्छेदम् कृत्वा लिखत- 4

(1) कृषकः- ......................................
(2) त्रिकालः - .....................................
(3) क्+ र्+अ+म् + अ =
(4) उ+न्+न्+अ+त्+इः =

प्र-6 अधोलिखितवाक्येषु रेखांकितपदाना समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा

लिखित- 1X4=4

I. <u>अत्रान्तरे</u> ब्राह्मणोऽपि श्राद्धार्थं राज्ञा निमन्त्रित:।
II. <u>हितोपदेशस्य</u> संग्रहकर्ता नारायणपण्डित: अस्ति।
III. प्रातः आकाशे <u>भानु+ उदयः</u> भवति।
IV. एतत् कार्यम् <u>अद्यैव</u> करणीयम्।

प्र-7 उचित-शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत- 1X3=3

I. ......................... प्रकाशेन तम: विनश्यति।
(अ) भानुम् (ब) भानवे (स) भानो: (द) भान्वो:
II. अहम् ......................... आम्रवृक्षम् आरोपयामि।
(अ)वाटिकायाम् (ब) वाटिका (स) वाटिकां (द) वाटिकानाम्
III. मोहन: ....................... फलानि यच्छति।
(अ)बालम् (ब) बालेभ्य: (स) बालान् (द) बाला:

प्र-8 उचित-धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत- 1X3=3

I. आवां पाठम् ........................।
(क) अपठत् (ख) अपठाम (ग) अपठाव (घ) अपठम्
II. सर्वे सुखिन: .....................।
(क) भवतु (ख) भवन्तु (ग) भवसि (घ) भवन्ति
III. श्व: अहम् उपवासम् .................................... ।
(क) करोमि (ख) करोति (ग) करिश्यति (घ) करिष्यामि

प्र - 9 गद्यांशम् पठित्वा प्रश्नान् उत्तरत। 6

बालस्स्य अत्र रक्षक: नास्ति। तत्त किं करोमि ? भवतु, चिरकालपालितम् इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां व्यवस्थाप्य गच्छामि। तथा कृत्वा गत:। ततस्तेन नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्प: दृष्ट:। स तं व्यापाद्य खण्डश: कृतवान्। अत्रान्तरे ब्राह्यणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत:। ब्राह्यणं दृष्टवा नकुल: रक्तविलिप्तमुखपाद: तस्य चरणयो: अलुठत्। विप्र: तथाविधं तं दृष्ट्वा बालकोऽनेन खादित: इति अवधार्य कोपात् नकुलं व्यापादितवान्। अनन्तरं यावत् उपसृत्य अपत्यं पश्यति तावद् बालक: सुस्थ: सर्पश्च व्यापादित: तिष्ठति। तत: तम् उपकारकं नकुलं मृतं निरीक्ष्य आत्मानं मुषितं मन्यमान: ब्राह्यण: परं विषादम् अगच्छत्।

(क) एकपदेन उत्तरत
(I) नकुलः कम् खंडशः कृतवान्?
(II) कः विषादम अकरोत ?
(ख) पूर्णवाक्येन उत्तरत
(I)ब्राह्मणम दृष्टवा नकुलः किम् अकरोत ?
(ग) निर्देशानुसारं उतरत
(I) ब्राह्यणोऽपि श्राद्धं गृहीत्वा गृहम् उपावृत:। अत्र क्रियापदम् किम्?

(II) प्रसन्नता पदस्य विलोमपदम् चित्वा लिखत।

प्र-10 नाट्यांशम् पठित्वा प्रश्नान् उत्तरत - 6

मेवाडाधिपति: महाराणाप्रताप: अरण्ये कतिपयै: विश्वासपात्रै: भटै: सह संकटापन्ने काले विचारमग्न: शिलायाम् उपविष्ट: अस्ति। स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि। हन्त! वराकस्य पार्श्वे सेनाया: भोजनसामग्र्या: अपि च अभाव: विद्यते। अधुना तु स स्वकीयै: प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति।

प्रताप: - धिङ्. माम् अधन्यम् योऽहं मातृभूमिं रक्षितुम्, असमर्थ:। अलं मम एतेन जीवितेन। (दीर्घं नि:श्वसिति) (यावत् सहचरा: तस्य आकृतिं दृष्ट्वा व्याकुला: भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्र:)

राजपुत्र:- (राजोचितं प्रणम्य) विजयतां महाराज: विजयताम्।

प्रताप: - (समाश्वस्य) अयि भ्रात:! कथं जयघोषं कृत्वा मां लज्जयसे ?

राजपुत्र - देव! कथं भवान् वदति एवम्? किं न खलु कृतं भवता राज्यत्राणाय ? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान्!

प्रताप: - कुतस्तावद् विजय:! स्वदेशमेव त्यक्तुं तत्परोऽहम्।

भट: - (अञ्जलिं बद्ध्वा) महाराज ! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तार: वयम्। वयं सर्वे त्वाम् अनुगमिष्याम:।

प्रताप: - एवं न वक्तव्यम् । कृतज्ञोऽस्मि भवताम् अहम्। वीरै: धीरै: बहु उपकृतं देशस्य। सवदेशे एव तिष्ठद्भि: भवद्भि: देशस्य स्वतन्त्रतायै प्रयत्न: समाधेय:।

सर्वे भटा:- देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्याम:।

प्रताप: - यथा रोचते भवद्भ्य:। प्रदेशोऽयम् अस्माभि: त्याज्य: एव।

(क) एकपदेन उत्तरत
(I) मेवाडाधिपति: क:आसीत् ?
(II)मेवाडाधिपति: महाराणाप्रताप: कुत्र उपविष्ट: अस्ति ?
(ख) पूर्णवाक्येन उत्तरत
(I) भट: अञ्जलिं बद्ध्वा किम् कथयति ?
(ग) निर्देशानुसारं उतरत
(I) 'प्रदेशोऽयम् :' अनयो:पदयो: विशेष्यपदम् किम् ?
(II) 'जयकारम्' पदस्य पर्यायपदम् चित्वा लिखत।

प्र-11 गद्यम् पठित्वा प्रश्नान् उत्तरत - 6

अन्येद्यु स मुनि: समन्विष्य तं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत- "ब्रह्यन्! किं पतिव्रतया तया इह त्वं प्रेषित:? "तत् आकणर्य स मुनिर्विस्मित: तं धर्मव्याधम् अवदत्-"भद्र! मांसविक्रयिण: ते कथम ईदृशं विज्ञानम्"? धर्मव्याध; अवदत्- "ब्रह्यन्! अहं

मातापित्रोर्भक्त:। तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयोत्वा भोजनं स्वीकरोमि। शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां ह मृगादीनां मांसानि स्वधर्मं इति मत्वा वृत्यर्थं विक्रीणे, न तु धनलिप्सया। हे मुने! ज्ञानविघ्नोनोऽहक्डार:। अत: स्वधर्मं चर, येन आशु परं श्रेय: अवाप्स्यसि"।

ततश्च धर्मव्याधेन एवम् अनुशिष्ट: स मुनि: तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य परितुष्ट: वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम्। उक्तञ्च-
कर्मणैव हि संसिद्धिम् आस्थिता जनकादय:।

(क) एकपदेन उत्तरत-
(I) मुनिः कुत्र गतवान ?
(II) कः मातापित्रों भक्तः आसीत्?
(ख) पूर्णवाक्येन उत्तरत-
(I) धर्मव्याधः किम् अवदत्?
(ग) निर्देशानुसारं उतरत-
(I) अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि। अत्र क्रियापदम् किम्?
(II) संतुष्टः पदस्य पर्यायपदम् चित्वा लिखत।

प्र- 12 प्रश्ननिर्माणं कुरुत- 6

1. वीरै: धीरै: बहु उपकृतं <u>देशस्य</u>।
2. <u>अविवेक</u>: परमापदां पदम् भवति ।
3. अहं <u>त्रुटितान्</u> तन्तून् संयोजयामि।
4. अष्टावक्र: <u>पण्डितै</u>: सह शास्त्रार्थं कृत्वा तान् अजयत्।
5. नकुलं <u>बालरक्षायां</u> व्यवस्थाप्य गच्छामि।
6. अतोऽहं षण्मासाभ्यन्तरे <u>भवत्पुत्रान्</u> नीतिशास्त्राऽभिज्ञान् करिष्यामि।

प्र-13 अन्वयम् पूरयित्वा लिखत - 4

सहसा विदधीत न क्रिया-
मविवेक: परमापदां पदम्।
वृणते हि विमृश्यकारिणं
गुणलुब्धा: स्वयमेव संपद:॥

अन्वय**-** क्रियाम् .................... न विदधीत, अविवेक: परम् .................पदम् (अस्ति)।...............: सम्पद: स्वयम् एव .....................(नरम्) हि वृणते।

प्र- 14 कथापूर्ति कृत्वा लिखत- 4

1. राजा सविनयं पुनरवदत्- ……………………..
2. देव! ………………एते राजपुत्रा

3. तत् मया ..........ग्राहयितुं शक्यन्ते।'
4. तदेतेषाम् ..................नीतिशास्त्रोपदेशाय भवन्त: प्रमाणम्

| महाकुलसम्भूता,कोऽत्र सन्देह: ?,नीतिं,अस्मत्पुत्राणां |
|---|

प्र-15 अधोलिखितकथनयो: उचितभावार्थं चिह्नेन प्रदर्शयत- 4

(1) सहसा विदधीत न क्रियाम्-

(क) सद्य (ख) सर्वदा (ग) सदा

(2) क्षिप्रमक्रियमाणस्य काल: पिबति तद्रसम्-

(क) कल (ख) मृत्यु: (ग) समयम्

(3) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।

(क) कार्येण (ख) नीलवर्ण: (ग) नाटकम्

(4) मार्गारब्धा: सर्वयत्ना: फलन्ति।

(क) फल (ख) सफलतां दास्यन्ति (ग) घटन्ति